श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ षष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षष्टितमः सर्गः ॥

## त्रिशङ्कोर्यज्ञं कारयितुमृषीन् प्रति विश्वामित्रस्यानुरोध ऋषिभिर्यज्ञस्यारम्भः, सशरीरस्य त्रिशङ्कोः स्वर्गलोके गमनं स्वर्गादिन्द्रेण पात्यमाने त्रिशङ्कौ विक्षुब्धेन विश्वामित्रेण नूतनदेवसर्गायोद्यमो देवानामनुरोधेन तस्य ततो विरामश्च

तपोबलहताञ्ज्ञात्वा वासिष्ठान् समहोदयान्।
ऋषिमध्ये महातेजा विश्वामित्रोऽभ्यभाषत ॥ **1.60.1** ॥

अयमिक्ष्वाकुदायादस्त्रिशङ्कुरिति विश्रुतः।
धर्मिष्ठश्च वदान्यश्च मां चैव शरणं गतः ॥ **1.60.2** ॥

स्वेनानेन शरीरेण देवलोकजिगीषया।
यथायं स्वशरीरेण देवलोकं गमिष्यति ॥ **1.60.3** ॥

तथा प्रवर्त्यतां यज्ञो भवद्भिश्च मया सह।
विश्वामित्रवचः श्रुत्वा सर्व एव महर्षयः ॥ **1.60.4** ॥

ऊचुः समेताः सहसा धर्मज्ञा धर्मसंहितम्।
अयं कुशिकदायादो मुनिः परमकोपनः ॥ **1.60.5** ॥

यदाह वचनं सम्यगेतत् कार्यं न संशयः।
अग्निकल्पो हि भगवान् शापं दास्यति रोषतः ॥ **1.60.6** ॥

तस्मात् प्रवर्त्यतां यज्ञः सशरीरो यथा दिवि।
गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा॥ **1.60.7** ॥

ततः प्रवर्त्यतां यज्ञः सर्वे समधितिष्ठत।
एवमुक्त्वा महर्षयः सञ्जह्रुस्ताः क्रियास्तदा॥ **1.60.8** ॥

याजकश्च महातेजा विश्वामित्रोऽभवत् क्रतौ।
ऋत्विजश्चानुपूर्व्येण मन्त्रवन्मन्त्रकोविदाः॥ **1.60.9** ॥

चक्रुः सर्वाणि कर्माणि यथाकल्पं यथाविधि।
ततः कालेन महता विश्वामित्रो महातपाः॥ **1.60.10** ॥

चकारावाहनं तत्र भागार्थं सर्वदेवताः।
नाभ्यागमंस्तदा तत्र भागार्थं सर्वदेवताः॥ **1.60.11** ॥

ततः कोपसमाविष्टो विश्वामित्रो महामुनिः।
स्रुवमुद्यम्य सक्रोधस्त्रिशङ्कुमिदमब्रवीत्॥ **1.60.12** ॥

पश्य मे तपसो वीर्यं स्वार्जितस्य नरेश्वर।
एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा॥ **1.60.13** ॥

दुष्प्रापं स्वशरीरेण स्वर्गं गच्छ नरेश्वर।
स्वार्जितं किञ्चिदप्यस्ति मया हि तपसः फलम्॥ **1.60.14** ॥

राजंस्त्वं तेजसा तस्य सशरीरो दिवं व्रज।
उक्तवाक्ये मुनौ तस्मिन् सशरीरो नरेश्वरः॥ **1.60.15** ॥

दिवं जगाम काकुत्स्थ मुनीनां पश्यतां तदा।
स्वर्गलोकं गतं दृष्ट्वा त्रिशङ्कुं पाकशासनः॥ **1.60.16** ॥

सह सर्वैः सुरगणैरिदं वचनमब्रवीत्।
त्रिशङ्को गच्छ भूयस्त्वं नासि स्वर्गकृतालयः॥ **1.60.17** ॥

गुरुशापहतो मूढ पत भूमिमवाक्शिराः।
एवमुक्तो महेन्द्रेण त्रिशङ्कुरपतत् पुनः॥ **1.60.18** ॥

विक्रोशमानस्त्राहीति विश्वामित्रं तपोधनम्।
तच्छ्रुत्वा वचनं तस्य क्रोशमानस्य कौशिकः॥ **1.60.19** ॥

रोषमाहारयत् तीव्रं तिष्ठ तिष्ठेति चाब्रवीत्।
ऋषिमध्ये स तेजस्वी प्रजापतिरिवापरः॥ **1.60.20** ॥

सृजन् दक्षिणमार्गस्थान् सप्तर्षीनपरान् पुनः।
नक्षत्रवंशमपरमसृजत् क्रोधमूर्च्छितः॥ **1.60.21** ॥

दक्षिणां दिशमास्थाय ऋषिमध्ये महायशाः।
सृष्ट्वा नक्षत्रवंशं च क्रोधेन कलुषीकृतः॥ **1.60.22** ॥

अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः।
दैवतान्यपि स क्रोधात् स्रष्टुं समुपचक्रमे॥ **1.60.23** ॥

ततः परमसम्भ्रान्ताः सर्षिसङ्घाः सुरासुराः।
विश्वामित्रं महात्मानमूचुः सानुनयं वचः॥ **1.60.24** ॥

अयं राजा महाभाग गुरुशापपरिक्षतः।
सशरीरो दिवं यातुं नार्हत्येव तपोधन॥ **1.60.25** ॥

तेषां तद् वचनं श्रुत्वा देवानां मुनिपुङ्गवः।
अब्रवीत् सुमहद् वाक्यं कौशिकः सर्वदेवताः॥ **1.60.26** ॥

सशरीरस्य भद्रं वस्त्रिशङ्कोरस्य भूपतेः।
आरोहणं प्रतिज्ञातं नानृतं कर्तुमुत्सहे॥ **1.60.27** ॥

स्वर्गोऽस्तु सशरीरस्य त्रिशङ्कोरस्य शाश्वतः।
नक्षत्राणि च सर्वाणि मामकानि ध्रुवाण्यथ॥ **1.60.28**॥

यावल्लोका धरिष्यन्ति तिष्ठन्त्वेतानि सर्वशः।
यत् कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ॥ **1.60.29**॥

एवमुक्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुङ्गवम्।
एवं भवतु भद्रं ते तिष्ठन्त्वेतानि सर्वशः॥ **1.60.30**॥

गगने तान्यनेकानि वैश्वानरपथाद् बहिः।
नक्षत्राणि मुनिश्रेष्ठ तेषु ज्योतिःषु जाज्वलन्॥ **1.60.31**॥

अवाक्शिरास्त्रिशङ्कुश्च तिष्ठत्वमरसन्निभः।
अनुयास्यन्ति चैतानि ज्योतींषि नृपसत्तमम्॥ **1.60.32**॥

कृतार्थं कीर्तिमन्तं च स्वर्गलोकगतं यथा।
विश्वामित्रस्तु धर्मात्मा सर्वदेवैरभिष्टुतः॥ **1.60.33**॥

ऋषिमध्ये महातेजा बाढमित्येव देवताः।
ततो देवा महात्मानो ऋषयश्च तपोधनाः।
जग्मुर्यथागतं सर्वे यज्ञस्यान्ते नरोत्तम॥ **1.60.34**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षष्टितमः सर्गः॥